# Sharmavatikritam Parvati Stotram 8

# शर्मवतीकृतं पार्वतीस्तोत्रम् ८

## Document Information

Text title : Sharmavatikritam Parvati Stotram 8

File name : sharmavatIkRRitaMpArvatIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, pArvatI, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 490/80-92||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# शर्मवतीकृतं पार्वतीस्तोत्रम् ८

“नमस्ते शाङ्करि रक्षाकरि प्राणातिवल्लभे ॥ ८० ॥

सर्वकामप्रदे सत्ये भक्ताया हृदयङ्गमे ।
नमस्तेऽष्टगुणैश्वर्यवत्यै सत्यै नमो नमः ॥ ८१ ॥

ध्यायन्ति योगिनस्त्वां चार्चयन्ति स्नेहवस्तुभिः ।
सम्यग्भावात्मकैः पुष्पैरर्चयामि महेश्वरि” ॥ ८२ ॥

इत्युक्त्वा प्रणनामाथ पार्वती तामुवाच ह ।
परितुष्टाऽस्मि ते पुत्रि वरं प्रार्थय वाञ्छितम् ॥ ८३ ॥

विषकन्या तदोवाच सर्वं जानासि चेश्वरि ।
भर्तुरर्थे मया सर्वः कृतोऽयं तपउद्यमः ॥ ८४ ॥

तत्किं तेन करिष्यामि साम्प्रतं जरयाऽऽवृता ।
वसाऽत्र पार्वति नित्यं कन्यानां शुभदा भव ॥ ८५ ॥

इत्युक्ता पार्वती तथास्त्विति प्राह ततः परम् ।
पस्पर्श पाणिना कन्यां चकार नवयौवनाम् ॥ ८६ ॥

उवाचोनषोडशाब्दां दिव्या चम्पकसदृशीम् ।
वद कन्ये वरारोहे किमिष्यते ततः परम् ॥ ८७ ॥

कन्याऽऽह मातः शम्भोर्मे दर्शनं कारय प्रभोः ।
सती प्राह समागच्छ कैलासं सिंहसंस्थिता ॥ ८८ ॥

इत्युक्ता सा शर्मवती ययौ कैलासमेव तु ।
दृष्ट्वा च शङ्करं साध्वी लब्ध्वा मन्त्रं तु वैष्णवम् ॥ ८९ ॥

“ॐ नमः श्रीकृष्णनारायणाय स्वामिने नमः” ।
कण्ठे च तुलसीमालां गृहीत्वा सात्त्वती तदा ॥ ९० ॥

अभवद्वैष्णवी कन्या नारायणपरायणा ।

अन्ते नारायणं लब्ध्वा पतिं मुक्तिं जगाम सा ॥ ९१॥

इत्येवं कथितं लक्ष्मि! शर्मवत्याः शुभावहम् ।
तापस्याः शुक्लचरितं विषकन्यातपः परम् ॥ ९२॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ४९०-अध्यायान्तर्गतं शर्मवतीकृतं पार्वतीस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ४९०/८०-९२॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 490/80-92..

Proofread by PSA Easwaran

*Sharmavatikritam Parvati Stotram 8*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*